International Journal of Sanskrit Research 2016; 2(6): 62-65

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 62-65
© 2016 IJSR
www.anantaajournal.com
Received: 15-09-2016
Accepted: 16-10-2016

**श्रीप्रकाशः गोगिकारः**
प्रवाचकः श्रीविश्वेश्वर संस्कृतान्ध्र, कलाशाल. तेलंगाण राज्यः, भारतः।

**Correspondence**
**श्रीप्रकाशः गोगिकारः**
प्रवाचकः श्रीविश्वेश्वर संस्कृतान्ध्र, कलाशाल. तेलंगाण राज्यः, भारतः।

# मेघसन्देशः हरिकथागानम्

**श्रीप्रकाशः गोगिकारः**

**सारांश**
अयं मेघसन्देशः हरिकथा काव्यं श्रीमान् एन्. च्. हेच्. कृष्णमाचार्यमहोदयेन पञ्चाशत् वर्षात्पूर्वंआन्ध्रभाषा लिप्यां विरचितम्। एतस्याः निजरचना प्रति नप्राप्तं किन्तु प्रतिःप प्रत्येव प्राप्तं। तदेव मया देवनागरि लिप्यां परिवर्तनं कृतम्। अस्मिन् काव्ये चतुर्दश रागाः सन्तिअन्यञ्चगद्यपद्यात्मक अद्भुत वर्णनमस्ति अस्मिन्काव्ये।

**प्रस्तावना**
**भैरवीरागः आदितालः**

॥पल्लवि॥ अलकापुरी अक्षिपर्वकरी॥अल॥
॥अनुपल्लवि॥ कलिता निधानैः कमनीयोद्यानैः।
॥मिश्रगति॥ स ललित बाह्योद्यान् हरशरश्चन्द्रिका धौतहर्म्याकुलपतिना यक्षेश्वराणां बलवता गुणवता सदा परिपालिता। ॥अ॥

॥वचनम॥ एवं विराजमाने अलकापत्तने कश्चित् यक्षः कस्मिंचित् अधिकारे कुबेरेण नियुक्तः। सः अति कामी अधिकारस्थितोपि निज दयितालग्नमानः। एकदा स्वकार्ये प्रमादं प्राप। तेन अतीव कुपितःकुबेरः "रे यक्षः येन कारणेन त्वं मम नियोगा अपराद्धः तेनैव कारणेन एकवत्सर परिमितः कालं प्रियावियोगं अनुभव इति शशाप।
यक्षोपि देवयोनित्वात् स्वयमपि कतिचन महिमभिः अन्वित एव। तथापि शापवशात् नष्ट महिमासन् प्रभुणा कुबेरेण देशात् निष्कासितः। का गतिः? विधि रलङ्घ्या। सर्वोपि दोषकरण काले हसन्नेव करोति। रुदन्ननुभवति। तदा यक्षः–॥मञ्जरी॥

रहितः प्रभया चक्रेवसतिं रामगिर्याश्रमेषु।
सहितच्छायाविटपिषु सिता स्नानपुण्योदकेषु॥

॥वचनम। रज्यप्रलुब्धधिया कैकेय्या वनं प्रेषितो रमः यदा अमुं पर्वत आश्रितः? तदाप्रभ्रुति गिरिरयं रामगिरि रिति प्रधां अवाप। यक्षोऽपि कुपितेन कुबेरेण शप्तः अधिकारात् च्युतः ततोऽपि प्रियतमात् कान्ता प्रेम साम्राज्यात् च्युतः रामगिरिरेव स्वपोषणार्थं उचित इति मत्वा तत्सानुषु पर्यटन्नास्ते। इति मन्तव्य स यक्षः विरहातुरः तत्र तत्र भ्रममाण मुहुर्मुहः प्रियामेव अनुस्मरन् निश्वसन् क्रमशः कृषो बभूव। अङ्गुलीयकं करकण्कण मेखलेव अभूत।

**सिन्धुभैरवि रागः**
॥श्लोकः॥तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तस्सकामी नीत्वा मास्या कनकवलय भ्रंश रिक्तपुकोष्ट्।
आषाढस्य प्रथमदिवसे मेघ माश्लिष्ट सानु वप्रक्रीडा परिणत गजप्रेक्षणीयं ददर्श॥

विरहानुभवेन अष्टौ मासा व्यतीताः। आषाढमासः प्रविवेश तदैव कच्श्रिचत् मेघः रामगिरि सानुं अश्लिष्यत। स मेघः दन्ताभ्यम् उत्खातकेळिलारी गज इव स्थितः। तं दृष्ट्वा यक्षः द्वि गुणित विरह तापः अन्तःस्तम्भित बष्पस्स्न् चिरं चिन्तादूनय अभवत।
प्रियजनविरहितः मेघलोकेन कामपर्याकुलो भवतीति प्रसिद्धिः। रामोऽपि सीताविरहे मेघलोकेन पर्याकुलो भवत्किल। प्राकृतः यक्षः कियान।

तत्र अलकायां स्वेनसह समाव स्थापन्ना स्वकुशल वार्तां जानन्ती मेघलोके भृशं उद्विजन्ति। प्राणत्यगोन्मुखी भवेत। एवं माभूत् एतन्मेघ द्वारा एव स्वकुशलमयी वार्ता प्रियायै प्रेषणीया। तद सा जीवितं आलम्बयिष्यति। इति विचार्य यक्ष् कुटजकुसुमैः मेघाय पूजां प्रकल्प्य प्रथमं स्वागतं व्याजहा। किमेतत ? धूमज्योतिस्सलिल मरुति सन्निपातेन जातो मेघः। जड पदार्थः। सन्देशार्थाःसमर्ध मुख करचरणादि युक्तैः प्राणिभिः प्रापणीयाः। कथ मेतत् संगच्छति? यक्षः एतत् न विचाचार। पुरा एकं आभाणकमस्ति। "कामातुराणां न भयं न लज्जा इति। अंतु कामार्ताहि प्रकृति कृपणा श्चेतना चेतनेषु" इत्यपि संयोजनीयं आसीत्। मेघमुद्दिश्य एवं ब्रूते यक्षः।

**बिलहरि रागः खंडगतिः**

॥पल्लवि॥ स्वागतमिदं सखे। ह्यागतो ह्यभि मुखे॥

॥अनुपल्लवि॥ जागृहि ममवचश्रवणे विपदि सखे॥॥स्वा॥

॥चरणम॥ भुवनविदितादभवान् जवतोवतीर्णवान्

अवनीधरे पुष्कलावर्तकान्वयात॥॥स्वा॥ ॥चरम॥ जानामि

मघवत्प्रधान पुरुषस्त्वमिति

जानामि कामरूपेण चरसीति।

तेनाहमुपगतोऽर्थित्वं तव पुरतोहीन स्स्वजनेना हीन विधि विपाकेन॥

॥स्वा॥

॥वचनम॥ भो!पयोदवंशतिलक ! ग्रीष्म संतप्तानां विरह संतप्तानांत्वमेव

शरणमसि। परं त्वहम् धनपति क्रोधेन प्रिया विश्लेश संज्वरं अनुभवामि। मत्प्रियां प्रति सन्देशहरणेन तमपनेतुमर्हसि। इति ययाचे यक्षः। याञ्चाभङ्ग भयमपि न प्रपेदे। किमितिचेत्? मेघायं महावंशप्रभूतः। तस्मात् "याञ्चामोघ वरमदगुणे नाधमे लब्धिकामा" इति यक्षः मेघं ययाचे। भो! सभास्तारा:। अत्रैकोविशयः। यक्षेन मुहुर्मुहुः कुभेरस्य क्रोध एव उद्घाट्यते। नतु स्वस्य अधिकार प्रमादः। इयं लोकरीतिः यक्षो ब्ते हे! प्रिय जलधर! प्रथमं ते गन्तव्याः अलकायमार्गाः श्रूयतां। सखे! ततः पश्य पवनः अनुकूलः मन्दं मन्दं वहनभसि, आबद्धमालाः बलाकाः चातकाः मधुर मधुरं कूजन्तः शुभ शकुनं सूचयन्ति। मध्येमार्गे पथिक कान्ताः उद्ग्रुहीतालकान्ता त्वां सविश्वासं प्रेक्षिष्यन्ते। श्रवणसुभगं तव गर्जितं श्रुता मानसोत्काः राजहंसाश्च कैलासपर्यन्तं ते नभो मार्गे सहायाः भविष्यन्ति। अपि च

**खरहरप्रिय रागः आदितालः**

॥पल्लवि॥आपृच्छ स्वैनं गिरिवरं दृ आलिङ्ग्य सादरं

अतितुङ्गशिखरम्॥आ॥

॥अनुपल्लवि॥ आपत्सखा! श्रीराम पावन श्रीपद विन्यासैः अङ्कित

मेखलोत्करम॥ ॥आ॥

॥चरण।म्॥ काले भवता कालेनैवहि कलित वियोगं।

काले तस्मिन् निस्रुताश्रुकंगाढरुचिर मैत्री प्रकाशकं ॥ ॥आ॥

॥वचनम् अपिच भ्रातः! जलदः! पवनोद्धूत गिरिशृङ्ग इति भ्रान्त्वा मुग्ध सिद्धाङ्गनाभिः साश्चर्यं दृश्यमानः। अस्मात् स्थानात् उत्तराभिमुखस्सन् उत्पततु भवान। पश्य इदमैन्द्रं धनुः। रत्नच्छायाव्यतिकर इव वल्मीकाग्रात् प्रभवति। प्रभूतेनानेन धनुः खण्डेन शोभिताङ्ग स्त्वं शिखिपिञ्छधारी गोपालकृष्ण इव बाभासि। ते मार्गश्रान्तिः कथं अपनोद्या इति मा शंकेधाः। मध्ये आम्रकूट नामा गिरिरस्ति।बवर्द्धर्षितेनधारासं पातेन प्रशमित दावानलः सगिरः कृतज्ञता निवेदनार्थं स्वशिखरे तुभ्यं स्थानं दास्यति। तत्र किञ्चिद्विश्रम्य गम्यतां।

॥मञ्जरी॥प्रथमोपकृतः क्षुद्रोऽपि जनः प्राप्तं मित्रं न जहातिकथ मधिक गुणोद्रि राम्रकूटो गौरवं त्वयि न याति तस्मा त्तत्र विश्रम्य तो योत्सरेण। द्रुततर गमनस्सनप्रयाहि। रेवा नामनदी ते दृष्टि पथे पतिष्यति। सा विषमोपले विन्ध्यप्र त्यन्तपर्वते विशीर्णासति प्रवहति। इतः पूर्वं आम्रकूटे वृष्टोदकत्वात् लघुगमनः अभूः पुनः वनगजमदैः वासितं जम्बूकुञ्ज प्रतिहतरयं रेवातोयं गृहीत्वा गम्यताम्। पुनः लब्ध बलं त्वां अनिलः तुलयितुं शक्तो न भवति। "रिक्त स्सर्वो भवति हि लघुः पूर्णता गौरवाय"। हे सखे! अपिच श्रूयतां जम्बू कुञ्ज प्रतिहत्या कटुतिक्त भूतं रेवातोयं तव आमय शांत्यै प्रभविष्यति। मेघः! तधा तव नभोमार्ग गमनकाले चित्रमेकं भविष्यति। श्रुणु। तदात्व एव सिद्धा स्सवधूकाः नभसि चरिष्यन्ति। भवान् यदा सहसा गम्भीरं गर्जति तस्य श्रवणात् उद्विग्नाः सिद्धवनिता ससम्भ्रमं स्वपुरुषान् स्वयमेव आश्लिष्यन्ति। पुरुषाः स्वयं ग्रहाश्लेषसुखं अनुभवन्तः भवन्तं ससम्मानं दक्ष्यन्ति। अयमेकः सुकृत विशेषो भवतः। अनेन पर्वते पर्वते कालविलम्बं माकल। तत्र मयूराणां केकाः स्वागतीकृत्य आशुगच्छ। नोचेदलकायां मे दयितायाः जीवितं संशयास्पदं भवेत। हे! जलद ! ततः प्रस्थाय।

**कापिरागः– खंडगतिः**

॥पल्लवि॥ प्रविश विदिशा राजधानीं सर्वदिक प्रधितविभवां परमानिधानीं। ॥प्रविश॥॥अनुपल्लवि॥नवनवो पवनोप शोभिनीं दशार्णप्रान्तवप्रान्तर स्थायिनीम॥प्रविश॥॥चरणम॥ परिणत फलश्याम जम्बू वनांतांपरिमित दिनस्थायि हंसोदन्तां

परिपूर्ण् कामुकफलं चानुभूयतांवरवेत्र वत्सरित् पाधः प्रपीयतां॥प्रविश॥

॥वचनम॥ अयि सखे! वेत्रवतीपयः पानानन्तरं किञ्चिद्विश्रामः आवश्यकः खलु! त्वत्सम्पर्कात् प्रौढपुष्प कदम्बव्याजेन पुलकित इवस्थितं नीचौर्गिरिं अध्युष्य विश्रम्य, वननदीतीरजातानि सिञ्चन् पुष्पलवनेन श्रांतानां पुष्पलादीनां मुखेषु अक्षिमतां अक्ष्णोः सार्धक्य जननी उज्जयिनीनाम नगरी आस्ते। सा तव पथि न स्थित। पन्थाः वक्रोऽपि उज्जयिन्याः विमुखो मास्मभूः कुत इति चेत ?

॥श्लोकः।विद्युद्दम स्पुरित चकितैः यत्र पौराङ्गनानां॥

लोलापाङ्गैः यदि न रमसे लोचनैर्वञ्चितस्स्याः॥

वेणीभूत प्रतनु सलिलो सात्वती तस्य सिन्धुय।

पाण्डुच्छाया तटरुहतरु भ्रंशिभिः कीर्णपर्णैः॥

सौभग्यं ते सुभग विरहावस्थया व्यञ्जयंती।

कार्म्यं येन त्यजति विधिना स त्वयै वोपपाद्यः॥

॥वचनम॥अहो! नयनपर्वकरं उज्जयिन्याः रमणीयकम। तामनुस्रुत्य सात्वतीनदी प्रवहति। ग्रीष्मेशुष्कैः पत्रैः कीर्णतटा प्रतनुसलिला सती तव विरहावस्था मनुभवन्तीव स्थिता। येन विधिना सा कार्म्यं त्यजति तथा कुरु॥॥श्लोकः॥ प्राप्यवन्ती नुदयन कथाकोविद ग्रामवृद्धान। पूर्वोद्दिष्ट मनुसर पुरीं श्रीविशालां विशालाम ॥

॥वचनम॥अवन्ति कथाः श्रुत्वा ततः उज्जयिनी प्राप्नुहि। "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति खलु शास्त्रमर्यादा! भुक्तपुण्यफलशेषेण सह क्षितिमागतैः आर्जितं एकं कान्तिमत् खण्डमेव नूनं उज्जयिनी। तस्याः पार्श्वतः शिप्रानदी तस्यां विकचकमलानि। तन्मध्ये कलहंसाः तत्र प्रति प्रत्यूषं कमलगन्धेनसह वहतः वायोः स्पर्शेन सर्वा अपि ग्लानयः ह्रियन्ते कलहंसानां कलकलरवाः मधुरं श्रूयन्ते। किं भहुना? सकल सम्पदा माकरः उज्जयिनी। तस्याः विपणिषु दृश्यमानैः रत्नैः समुद्राः तोयमात्राव इति भावो जायते। अतैव प्रद्योतप्रिय दुहितरं वत्सराजः जह्रे। अत्रैव प्रद्योतस्य हैमं तालवनमभूत। अत्रैव नलगिरिर्नाम गजः आलानस्तम्भं उत्पाट्य स दर्पं बभ्राम। अत्रस्थाः योद्धारः रावणस्यापि जयशीलिनः। तत्रस्था हयाः सूर्यस्यापि हयानतिक्रामन्ति। हे! सखे! अस्यां पुर्यां॥श्लोकः॥जालोद्गीर्णै रुपचितवपुः केशसंस्कार धूपैः।

बन्धुप्रीत्या भवनशिखिभिः दत्त नृत्योपहारः॥

हर्म्येष्यस्याः कुसुमसुरभि ष्वध्वखेदं नयेधाः।

पश्यन् लक्ष्मीं ललितवनिता पादरागाङ्कितेषु॥

॥वचनम॥ भो! प्रियसुहृत!मध्येस्थितानि देवायतनानि नातिक्रमणीयानि।

तत्र गन्धवती तटिनी निकटे महादेवः प्रसादमकरोत। त्वम

**बेहन् रागं–आदितालः**

॥पल्लवि॥चण्डीश्वरं भावय–सेवया

॥अनुपल्लवि॥ तन्डु प्रमुखाः–तद्गळरुचिरिति

मण्डली भूयत्वां दृ मानयिष्यन्ति। ॥चण्डी॥

॥चरणम॥स्थातव्य मत्र त्वया आसायं नेतव्य मवधारय तदानीम।

॥मिश्रगति॥ आतत निज गर्जारवान – सन्ध्याबलिपटहारवान – भवान्प्रीतिपूर्व मुपकल्पयतु शिव प्रीतिर्भवतु–फलमपि ते भवतु। ॥च॥॥चरणम॥पुर–हरसन्ध्या ताण्डव नमये–भुजतरुवन मभितः परिवेष्ट्यअरुणजपासुम कान्तिधरो–नागाजिन धरणेच्छां परिहत्य। ॥चण्डी॥

॥वचनम॥ततः पुर्यां नृत्त समये हरेण धृतं गजचर्म दृष्ट्वा भीताभवानी त्वदानीं शान्तोद्वेग स्थिमित नयनाभ्यां त्वां सभक्तिकं द्रक्ष्यति। तन्नृत्य समये अनुनृत्यं कुर्वत्यः अप्सरसोऽपि त्वद्विसृष्ट वर्षाग्र बिन्दुभिः शामितायासाः त्वयि कटाक्षमोक्षंकुर्युः।
ततः प्रस्थाय मध्यस्थ नदीनदान् परामृश्य तत्त द्रस मनुभूय वायुनैव प्रेरितः देवगिरिं गच्छतु भवान।

**रेवतिरागः–आदितालः**

॥पल्लवि॥देवं स्कन्दं कलय–तद्देवशैल माकलय ॥देवं॥

॥अनुपल्लवि॥देवचमुना मननाय–महादेवोऽयं निनाय–तं

पावकमुखतस्सभृतं शतभास्वत्कान्ति विराजितम। ॥देवं॥

॥चरणम॥ कुसुमासारैः स्नपय–नी रसता मसतां ग्लपय–असकृ

दृगर्जांप्रवर्तय–तस्साश्व मयूरं नर्तय। ॥देव॥

॥वचनम॥अहो! युवयोर्मैत्रीबन्धः। "गिरौ मयूरो गगने च मेघः"

इत्युक्तरीत्या लक्षान्तर दूरमपि त्वं गर्जसि स नृत्यति।

तत्तधास्थां। देवगिरौ स्थितस्य स्कन्दस्य आराधनान्तरं तं अध्वानं उल्लङ्घ्य कतिपयदूरं गत्वा सुरभि तनयालम्भजां स्रोतोमूर्त्या भुवि परिणतां रन्तिदेस्य कीर्तिं सम्मानयितुंचर्मण्वत्याख्यायाः तन्नद्याः तोय मादातुं तत्रावरतु भवान।
तदनन्तरं दशपुरवधू दृगुत्पलमालाभिः पूजितस्सन् तामुत्तर।
ततः प्रस्थाय।

**कल्याणिरागः– आदितालः**

॥पल्लवि॥ ब्रह्मावर्तं व्रजतु भवान् क्षत्र प्रधनपिशुनं कौरवं जनपदं।

॥ब्रह्म॥ ॥अनुपल्लवि॥ जिह्मता रहित–जीदनवद्ग्राम सीमसु

वर्षितुं–चेतोभिराम। ॥ब्रह्म॥

॥मि॥ धारापातै स्त्वमिव कमलानि नारा च शतै राजवदनानि शूरो

गाण्डीव धन्वा यत्र क्षोभयामास– तदिह पवित्र। ॥ब्रह्म॥

॥वचनम॥एतादृशं ब्रह्मावर्तं छायामात्रेणैव गाहस्व। तदनु कौरव पाण्डव समरविमुखेन बलभद्रेण सेवितां सरस्वतीं अधिगच्छ। अद्य हिमवत्पर्वत प्रान्त मासीदति। अत्रैव कनखलाद्रि मनुसृत्य गङ्गा शैलराजा ददतीर्णा। अपरं। नदीयं सगरस्य पुत्राणां स्वर्गसोपानपङ्क्तिः। परन्तु स्व फेनैः गौरीं विहसन्तीव्इन्दुलग्नोर्मिहस्ता सती शम्भोः केशग्रहणमकरोत। त्वं सुरगज इव तिरश्चीन स्सन्पूर्वार्धभागेन तज्जलं पातुं यतस्व। तव छाय प्रतिबिम्बनेन गङ्गा अस्थान यमुना सङ्गमेन भस्यति। गङ्गाजलं निपीय श्रमापनोदनार्थं हिमाद्रिशिखरे निषण्णोभव॥श्लोकः॥ तं चेद्वायौ सरति सरळस्कन्ध संघट्टजन्मा।

बाधेतोल्काक्षपित चमरीवालभारो दवाग्निः॥
अर्हस्येवं शमयितु मलं वारिधारा सहस्रैः।
आपन्नर्ति प्रशमनफलाःसम्पदोह्युत्तमानाम॥

॥वचनम॥तथा त्वं आपन्नार्ति प्रशमन फलमपि लप्स्यसे। तत्रत्वां दृष्ट्वा शरभमृगाः भवन्त मुल्लङ्गयितुं उत्पतिष्यन्ति। तदा तुमुलकरका वृष्टिपातेन तेषां अङ्गभङ्गं करोतु भवान्। नीचौःस्थितः यः कोऽपि जनःउच्चौः स्थितं यं कमपि महाजनं अधिगन्तुं यदि यतते तस्य अङ्ग भङ्गः श्रृङ्गभङ्गश्च फलं स्यत्। तत्तदा आस्ताम। अयि सखे! तत्र हिमवति शश्वत् सिद्धैः कृतपूजां शम्भुपादन्यासां कितां शिलां भक्त्या प्रण्म। तत्प्रणामे श्रद्दधानाः पुरुषाः देहापगमानन्तरं शिवसायुज्यं लभन्ते। तत्र।

**बहुदारि रागः–आदितालः**

॥पल्लवि॥गीयन्ते त्रिपुरविजयवार्त किन्नर योषित्संघैः।

शब्दायन्ते वेनवः पूरिताः मधुरतरं पवनतरङ्गैः॥

तव निर्ह्रादः तत्र भवतिचेत् तौर्यत्रिक परिपूर्तिस्यात् शिवताण्डव

रचनावेलायां सिद्धगणसेवितायाम्। ॥गीयन्ते॥

॥वचनम॥ अयिसखे! हिमवन्तं अतिक्रम्य मध्यस्थान् मानसोत्क हंस द्वारभूत भृगुराम यशोवर्त्मभूत क्रौञ्चरन्ध्रादीन् विशेषान् दृष्ट्वा परिक्र्म्य उदीचीं दिशमनुसरतु भवान्। तत ऊर्दवं कैलासपर्वतः अस्ति। तदभिज्ञान विशेषान् श्रुणु। तं गिरिं दर्पणीकृत्य त्रिदशवनिताः तस्मिन्स्वमुख सौन्दर्यं परिष्कुर्वन्ति तत्सानवः विश्लधिताः दृश्यन्ते। पुरा रावणः मदोद्धतः कैलासं उद्धर्तुं प्रायतत। किन्तु न शशाक। तस्मात् सानवः शिथिलबन्धाः कृताः। तादृक्पर्वतस्य अतिधिःस्याः। राजतत्वात् शुभ्रः स गिरिः कृष्णवर्णस्य भवतः धारणात् काञ्चिच्छोभां वक्ष्यति। अपिच हे सखे!

**कल्याणिरागः आदितालः**

॥श्लोकः॥ हि त्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता।

क्रीडाशैले यदि च विहरेत् पादचारेण गौरी॥

भङ्गी भक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः।

सोपानत्वं कुरु मणितटारोहणायाग्रयायी॥

॥वचनम॥ अनेन देवी पार्वती च त्वया सेविता स्यात। अत्र तव काचित् विपत् सम्भाविष्यति। सुरयुवतयः वलयकोटिभिः त्वयि रन्ध्राणि प्रकल्प्य त्वत्तो निस्रुतैः जलबिन्दुभिः स्वासां श्रम मपनयितुं त्वां यन्त्रधारागृहं करिष्यन्ति। मानस सरस्तोयं निपीय स्ववातैः कल्पद्रुम किसलयानि धुन्वन् ललितैः नानाचेष्टाभिः यधेष्टं विहर। ततः परं अलका ते सुलभं लक्षणीया। तत्र प्रासादाः सर्वलक्षणैः त्वामेव अनुकुर्वन्ति। श्रुणोतु भवान् बिम्बप्रतिबिम्बभावम।

**खःस् रागः– त्र्यस्रगतिः**

॥पल्लवि॥त्वयि स्पुरन्ति विद्युतः तेषु स्पुरन्ति योषितः।

त्वयीन्द्र चापसंगतिः तेषां तु चित्रसन्ततिः गर्जारवस्तवानने॥

मुरजस्वन स्तदाङ्गणे नीहारभास्त वान्तरे।

त्वमम्बरे बंभ्रम्यसे लुठन्ति ते विहायसे इति बिम्बता तदाश्रिता॥॥त्वयि॥

॥वचनम॥ सखे! जलद! तथा त्वत्प्रतिबिम्ब भूतैः प्रासादैः विराजमानां अलकां यावत्त्वं प्रविष्टः तावत् तत्रत्याः स्त्रियः त्वदागमन सन्तोषात् हस्ते लीलाकमलं अलकेषु कुन्दानि आनने लोध्रप्रसवरजः वेण्यां नवकुरुवकं कर्णे शेरीषं धृत्वा चरिष्यति।अपि च तत्र सर्वोऽपि जनः आनन्दभागेव। बाष्पाः आनन्दोत्थाः। तापः मदनेन। प्रण्कलह देवविरहः। नत्वन्नेर्निमित्तैः तत्र यक्षाः स्पटिकमणि हर्म्येषु अङ्गनाभिस्सह रतिफलाख्यं कल्पवृक्षानवं आसेवन्ते।
अपि च तत्र त्वदुपरोधेन कंचन कालं चन्द्रकिरणप्रसारो न भवति। तदनु त्वदपगमेन गवाक्षमार्गद्वारा प्रसृताः चन्द्रांशवः मिधुनानां ग्लानि मपनेष्यन्ति। किञ्च तत्र वैभ्राजाख्यं उपवनं प्रविश्यकिन्नराः कुबेरस्य कीर्तिं गायन्ति। तत्र मार्गाः मन्दारपुष्पैः कनककमलैः मुक्ताजालैश्च विचिता उषस्समये नेत्रोत्सव मापादयन्तिम। अपरं च हे सखे!
॥मञ्जरी॥
वासश्चित्रं दृक्पर्वकरं बहुभूषणानिसूते।

आसवाङ्गरागादीन्येको ह्यमरद्रुशिवताते॥ (स्वकीयोभावनः)
सखे! एताद्रुक्संपन्ना देशात् दुर्विधिना प्रभ्रंशितः अहं एवं दूये।प्रकृत मनुसरामि। अलकायां किञ्चित्परतोगच्छ। तत्र धनपति प्रसादः। तमतिक्रामतु भवान।

**अधाणरागः— खण्डगतिः**

॥पल्लवि॥धनपति गृहात्—उत्तरतोस्मदालयः। ॥धन॥
॥अनुपल्लवि॥ घनशचीपतिधनुः कमनीयतोरणः। ॥धन॥
॥चरणम॥तदुपान्त सीम्नि मे दयितया दर्थितोमन्दिर स्तबक नतोमुग्ध मन्दारको। ॥धन॥
॥चरणम॥वापी च मरकतैर्भद्धसोपाना तापहृत्सौवर्ण तामरसच्छन्ना॥ ॥धन॥
॥चरणम॥अध्युष्य तज्जलं व्यपगतत्रासाः।
अध्यात मानसाः आसते हंसाः। ॥धन॥
॥श्लोकः॥तस्या स्तिरे रचितशिखरः पेशलै रिन्द्रनीलैः।
क्रीडाशैलः कनककदळी वेष्ट न प्रेक्षणीयः॥
॥तोडिरागः॥मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण।
प्रेक्ष्योपान्त स्पुरितततटितं त्वां तमेव स्मरामि॥

॥वचनम॥ तन्निकटे रक्ताशोकः केसरश्च माधवीमंट्पे र्प्यासन्नास्तः। तन्मंटप मध्ये सायंसमयेषु मे प्रिया त्वत्सृहृदं नीलकण्ठं नर्तयिष्यति। द्वारोपान्ते शंखपद्मौ लिखितौ स्तः। सखे! एभिर्लक्षणैः मद्गेहं ल्क्षयेधाः। अपितु मद्वियोगेन नूनं कान्तिविहीनं भवतीति मन्ये। सूर्यात्समे कमलमिव मदालय मासाद्य मयापूर्वोक्ते क्रीडाशैले किञ्चिद्विश्रम्य शीघ्रसंपाताय कलभ इव कुञ्चित तनुर्भव। तथैव विद्युत्कान्तिं ज्योतिरिं गण्परिमितं अल्पीकृत्य अन्तः प्रसारय। तदा मम प्रियां लक्षयतु भवान।

**मरागः— आदिश्यातालः**
॥पल्लवि॥सुन्दरी नहि पीवरि—श्यामाकुन्द सदृशरदना मृदुगदना।
॥सुन्दरी॥
॥अनुपल्लवि॥ मन्दगमना दृ श्रोणिभरेण इन्दुसन्निभ वदना हितवदना।
॥सुन्दरी॥
॥चरणम॥ विचकित हरिणीप्रेक्षणा दृ वियदुपमवलग्ना विरहमग्ना।
॥विच॥ ॥
कुचभर नमितशरीरा दृ कुशलानाभि गभीरा पक्वबिम्बाधरा।
॥सुन्दरी॥
॥वचनम॥ मन्येहं सखे! इयं युवतिविषये ब्रह्मणः आद्यश्रृष्टिरिति। एतादृक् सौन्दर्यसंपन्ना मे प्रिया मद्विरहेण रुदितोच्छूननेत्रा उष्णनिश्वासैः भिन्नाधरोष्टी सती लम्बालकं अस्पष्टव्यक्तिकं मुखं हस्ते न्यस्य उपविश्तीति मन्ये। अपिच त्वयि तत्रोपगतेसति सा बलिव्याकुलावा विरहकृशं मां भवगम्यं लिखन्तीवा पञ्जरस्थां शारिकां मत्कुशलवार्तांप्रति पृच्छन्तीवा अधवा मद्गोत्राङ्कं पदंविरच्य दुःखेन विस्मृत्य मुहुर्मुहुः स्मृतिपथमारोप्य गातुकातूवा देहळीदत्तपुष्पैः मच्छापावधि कालं गणयन्तीव प्रथमं तव दृष्टिपथे निपतिष्यति। निशीधे विरहेण विगतनिद्रां तां वातायनस्थस्सन् मत्सन्देशेन तां सुखय। अयिभोः कष्टम। सा अधिक्षामा विरहशयने सन्निष्णैकपार्श्वा अश्रुपूरितलोचना मया सह अनुभूत पूर्वविषयान् स्मरन्तीव दृश्यते। अथवा तदानीं सा यदि लब्द निद्रास्यास्त? याममात्रं मास्मगर्जः। कुत इति चेत? स्वप्ने सा मम साहचर्यं अनुभवेत। तस्य विच्छित्तिर्माभूत। ततः शीतेन अनिलेन तां शनै श्शनैः प्रबोध्य त्वत्सनाधे गवाक्षे स्तिमितनयनां तांप्रति वक्तुं एवं प्रक्रमेधाः।

**मायामालळवगौळ रागः— आदितालः**
॥पल्लवि॥ चरति रामगिरिसानुघ कुशलं सहचरस्तेऽभियालम।
॥अनुपल्लवि॥ परिपृच्छति कुशलोदंतंप्रति पतिरबले तव संप्रति।

॥चरणम॥ विरह कृशेन कृशाङ्गं तनुना विप्लुताश्रुणा सा स्रझरं।परितापभरजुषापरितप्तं प्रबलोत्कण्ठे नात्युत्कण्ठम॥
अविरळश्वासिनोष्णश्वासं आत्मसङ्गिना त्वत्सम्बद्धं।
प्रविशति सङ्कल्पैस्तवनाधः परेण्विधिना प्रतिरुद्धपथः। ॥चरती॥
॥वचनम॥एवं मनसैव तवाङ्गसङ्गं अनुभवति ते प्रियः। अपि च मन्मुखेन इदमाह।

**कापिरागः— आदितालः**
॥पल्लवि॥ नहि नहि तव सादृश्यं—क्वचिदपि बहुशोऽन्वेषण परोऽहमपि हा।
॥नहि॥
॥चरण्म॥ नहि नहि लतासु—तव तनोशोभा नहि हरिणीषुते दृक्प्रतिभा।
नहि शशिबिम्बे तव वदनाभा—नहि शिखिबर्हे तव कचप्रभा॥
॥नहि॥
॥वचनम॥ अपि च प्रिये! प्रणयकम्पिताः तव चित्रं धातुरागैः शिलायां आलिख्य पादयोः पतितुमिच्चामि। तदा बाष्पाकुलितस्य मे दृष्टिः लुप्यते। न मे तावदपि भाग्यं। एवं विविध विभ्रमवशंगतं मां दृष्ट्वा वनदेवता अपि भाष्पं मुञ्चन्ति। त्वयास्पृष्टः तुषाराद्रिवाताः मया आलिङ्ग्यन्ते। अपि च कल्याणी! एवं अत्राहं आत्मना आत्मानं अवलंब्य त्वदर्थमेव जीवामि। मा कातरत्वं गमः। शारञ्गपाणौ भुजगशयना दुत्थिते मम शापान्तो भविष्यति। तत् शेषान्मासान् चतुरोऽपि लोचने मिलयित्वा गमय।

॥श्लोकः॥ पश्चादावां विरहगणितं तं तमात्माभिलाषं।
निर्वेक्ष्यावः परिणत शरच्चन्द्रिकासु क्षपासु॥
॥वचनम॥ इति मत्सन्देशं प्रियायै निवेद्य आवयोः जीवितं धारयेधाः। भो! जलद! त्वं निश्शब्द एव उपकारं करोषि! एतदेव धीरलक्षणं! गर्जद्घना न वर्षन्ति खलु! मयि अनुक्रोशं सौहार्दञ्च कृत्वा बन्धुकृत्यं निर्वहतु भवान। एतदस्तु तुभ्यं शुभाशंसनम ॥

"इति श्री एन.सि.हेच्.कृष्णमाचार्य महोदयेन विरचित मेघसन्देशः—हरिकथा समाप्तम"

॥शुभम॥